# काव्यपदार्थविमर्शः

डॉ. विभूतिनाथ झा

vibhutijha158@gmail.com

सारः

*सकलशास्त्राणि जनोपकाराणि लोककल्याणाय परमकारुणिकैः सर्वज्ञैः ऋषिभिः प्रणीतानि विद्यन्ते। अतः सर्वाणि शास्त्राणि लौकिकानि। शास्त्रेषु नैकोऽपि तथाभूतो विषयो यः लोकोपयुक्तो न भवेत्। यद्यपि कतिपये जनाः प्रतिपादयन्ति यत् शास्त्राणाम् उपयोगः लौकिक व्यवहारे न कदापि आसीत् न वा कदाचित् भविष्यति। शास्त्राणि विदुषां मनोविनोदमात्रविषयाणि सन्ति। तत्रत्यविषयाः न व्यावहारिका इति। परन्तु ते शास्त्रज्ञान विरहिताः अथ वा आसुरप्रवृत्तिकाः भवेयुः।*

**Keywords:** काव्य-परिभाषा, काव्यपदार्थः, काव्यलक्षणः

सकलशास्त्रसारभूतायां श्रीमद्भगवद्गीतायां लौकिकव्यवहारायैव अर्जुनव्याजेन सकलजीवकल्याणाय स्वयं भगवता श्रीकृष्णेनोपदेशः विहितोऽस्ति। तत्रैव प्रतिपादितमस्ति यत् मनुष्येषु द्वे प्रवृत्ती भवतः। एका दैवी प्रवृत्तिः या सकलजन कल्याणकारिका चतुर्वर्गपुरुषार्थसाधिका अस्ति। अपरा आसुरी प्रवृत्तिः या सकलजनकष्टदायिनी घोरनरकसाधिका अस्ति। सा प्रवृत्तिः प्राक्तनसंस्कारवशात् सहैव जन्मना आगच्छति। यथा यथा शरीरादिविकाशो जायते तथैव प्रवृत्तिरपि विकसिता भवति। पूर्णविकसितासु आसुरप्रवृत्तिषु मनुष्य एव राक्षसाः भवन्ति। दैवप्रवृत्तिकाश्च देवाः भवन्ति। एवञ्चासुरप्रवृत्तिकपुरुषाणां परमात्मनि, वेदादिशास्त्रेषु, धर्मादिषु च विश्वासो न भवति। ये परमनास्तिकाः देहाभिमानिनः प्रत्यक्षातिरिक्तप्रमाणज्ञानशून्याः स्वार्थमात्ररताः न केवलं समाजद्रोहिणः अपि तु स्वपरिवारविध्वंसकाः कामक्रोधादिदोषयुक्ताः स्वार्थमात्ररताः आत्मानमप्यन्धतमे तमसि पातयन्ति। एवं भूतेषु एव कश्चिद्दार्शनिकः चार्वाकः शरीरमेवात्मा इति प्रतिपादयन् प्रत्यक्षमात्रं प्रमाणं स्वीकरोति। शरीरत्याग एव मोक्ष इति प्रतिपादयन् यावज्जीवेतित्यादि [1] स्वकीय सिद्धान्तं व्याहरन् सामाजिकव्यवस्थां विघटयति। अत एव सर्वदर्शनमूर्द्धन्योऽद्वैतवेदान्तः उद्घोषयति यत्- "संसारेऽस्मिन् एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन।" तथा च श्रुतिः- "एकमेवाद्वितीयं ब्रह्म" "सर्वं ब्रह्ममयं जगत्" "अहं ब्रह्मास्मि" "सोऽहम्" इत्यादि। तथा च श्रीमद्भगवद्गीतायामपि पण्डिताः विद्याविनयसम्पन्ने ब्राह्मणे, गवि हस्तिनि, शुनि स्वपाके च समदर्शिनः एव भवन्ति।[2] इत्यादि प्रतिपादितमस्ति। एतावता ज्ञायते यत् नैकमपि किमपि वस्तु इह विद्यते यत् ब्रह्मभिन्नं भवेत्। एवं समुत्पन्नायां ब्रह्मबुद्धौ कस्य को वा अनुचितमप्रियं वा कुर्यात्। सर्वे सर्वेषामुपकारं प्रियमेव वा कुर्य्युरिति मनसि निधाय महात्मना गान्धि महोदयेन सत्याहिंसा-

---

[1] यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥ सर्वदर्शनसंग्रह, श्लोक१८

[2] विद्याविनयसम्पन्ने ब्राह्मणे, गवि हस्तिनि। शुनि चैव स्वपाके च पण्डिताः समदर्शिनः॥ गीता, अध्याय ५, श्लोक १८

विश्वबन्धुत्वरूपो राष्ट्रसिद्धान्तो निर्धारितः। किं बहुना एतच्छास्त्रमवलम्ब्यैव उपयुक्त सिद्धान्तबलेनैव युद्धादिनरसंहारमन्तरैव देशः स्वतन्त्रो विहितः इति सर्वे विदन्त्येव। तर्हि शास्त्रं न लोकोपयोगि इत्यादिकथनं तेषामज्ञानमूलकमेव प्रतिभाति।

तत्रापि काव्यम् काव्यं तु रामादिवत् प्रवर्तितव्यं न रावणादिवत् इति प्रतिपादनेन सर्वथा लौकिकमेव। अतोऽस्मिन् लोकविरुद्धं न किमपि विद्यते। लोके हि दृश्यते यथा अस्माकं शरीरम् पाञ्चभौतिकं स्थूलं विद्यते। तथैव काव्यस्य शरीरं शब्दार्थत्मकम्। यथैवास्माकं मनो-बुद्धिःअहङ्काराः अन्तः करणानि, तथैव काव्यस्याभिधालक्षणाव्यञ्जनेति तिस्रः शक्तयः। यथैव चास्माकं शरीरावयवविन्यासरीतिस्तथैव काव्यस्य लाट्यादिरितयः। यथैव शरीरसौन्दर्यवर्द्धकानि वस्त्राभूषणानि तथैव काव्यस्यापि शब्दगताः अर्थगताश्चालङ्काराः सन्ति। यथैव चास्माकं दोषाः हानिकराः गुणाश्च परिणामोपकारकाः तथैव काव्येऽपि दोषाः गुणाश्च भवन्ति।

एवञ्च उपर्युक्तपदार्थेषु न कश्चित् अस्माकमात्मा भवितुं शक्नोति तथैव शब्दार्थरीतिगुणालङ्कारादिषु कश्चित् काव्यस्यात्मा भवितुं न शक्नोति। इत्थं च यथैतद्भिन्नः व्यापकः सच्चिदानन्दस्वरूपः अस्माकमात्मा तथैव काव्यस्यापि रस एव भवितुं शक्नोति। अत एव रसो वै सः[3] इति सङ्गच्छते।

आधुनिकमतानुसारेण कवेः प्रलापः काव्यमिति। यतो हि कविः सृष्टेः सौन्दर्यस्य मर्मज्ञः उपभोक्ता च भवति। एवं यदा स उन्मत्तो भवति तदा तस्य प्रलापस्वरुपे तस्योन्मत्ततायाः कश्चित् प्रसादः सहृदयैरुपलभ्यते। कविः न शब्दनिर्माता अपितु शब्दस्य ललित गुम्फनमेव विदधाति। सा एव ललितगुम्फनयुक्त पदावली कवेः कार्यं काव्यं कथ्यते। कस्यापि विषयस्य चमत्कारपूर्णं सहृदयसंवेद्यवर्णनं येन शब्दसमूहेन भवेत् तदेव काव्यमिति।

भारतीय समीक्षाक्षेत्रे काव्यलक्षणस्य परिभाषायाश्च काव्यस्यात्मसम्बन्धे प्रश्नो विद्यते, कारणञ्चात्रात्मैव सारवस्तु विद्यते। कतिपये काव्याचार्याः आत्मानं विहाय स्वतन्त्ररूपेण परिभाषां विहितवन्तः। काव्ये पक्षद्वयं विद्यते- अनुभूतिं भावपक्षः, अभिव्यक्तिः कलापक्षश्च। यद्यपि उभयोः महत्वं वर्तते तथा एकः अपरस्य पूरक एव तथापि मुख्यता भावपक्षस्यैव। रसः काव्यस्य आत्मा इति स्वीकुर्वद्भिराचार्यैर्भावपक्षस्य प्रधानता स्वीक्रियते। अलङ्कारः रीतिर्वा काव्यस्यात्मानं स्वीकुर्वद्भिराचार्यैः अभिव्यक्तेः प्रधानता स्वीक्रियते। यथा कश्चिद्दार्शनिकः शरीरमेवात्मानं स्वीकरोति। यद्यपि उभयोः महान् अन्तरोऽस्ति तथा ध्वनिसम्प्रदायवादिनः वक्रोक्तिसम्प्रदायवादिनश्च यद्यपि भावपक्षं स्वीकुर्वन्ति परन्तु प्रवृत्तिस्तेषामभिव्यक्तिपक्षे ज्ञायते। किन्त्विह भावपक्षस्यैव विशेषप्रश्रयः अभूत्।

काव्यलक्षणविषये सन्ति विविधानि मतानि। येषु कतिपयानीह विचारार्थमुपस्थाप्यन्ते। तथा हि-

कविर्मनीषी परिभूः स्वयम्भूः (कवेः कृतिः काव्यम्)।[4]

संक्षेपात् काव्यमिष्टार्थव्यवच्छिन्ना पदावली।

---

[3] तैत्तिरीय उपनिषद् २.७.१

[4] शुक्ल यजुर्वेदे ४०.८

काव्यं स्फुटमलङ्कारं गुणवद् दोषवर्जितम्॥[5]

शरीरं तावदिष्टार्थव्यवच्छिना पदावली काव्यम्।[6]

शब्दार्थौ सहितौ काव्यम्।[7]

ननु शब्दार्थौ काव्यम्।[8]

रीतिरात्मा काव्यस्य।[9]

काव्यस्यात्मा ध्वनिः।[10]

गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ काव्यम्।[11]

शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ काव्यम्।[12]

अलङ्कारास्त्वलङ्कारा गुण एव गुणाः सदा।

औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्॥[13]

निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्।

रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति॥[14]

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।[15]

वक्रोक्तिः काव्यजीवितम्।[16]

निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।

---

[5] अग्निपुराणम् ३३६.६-७

[6] दण्डी, काव्यादर्शः १.१०

[7] भामह, काव्यालङ्कारः १.१६

[8] रुद्रटः, काव्यालङ्कारः २.१

[9] वामनः. काव्यालङ्कारसूत्रवृतिः २.६

[10] आनन्दवर्धनः, ध्वन्यालोकः१.१

[11] वाग्भटः प्रथमः, प्रतापरूद्रयशोभूषणम्

[12] वाग्भटः द्वितीयः, काव्यानुशासनम्

[13] क्षेमेन्द्रः, औचित्यविचारचर्चा श्लो..५

[14] भोजराजः, सरस्वतीकण्ठाभरणम्-१.२

[15] मम्मटः, काव्यप्रकाशः प्र. उ. १.४

[16]कुन्तकः, वक्रोक्तिजीवनम्

सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्॥[17]

अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्।[18]

निर्दोषं गुणालङ्कारीतिवृत्तम् काव्यम्।। -पीयूषवर्षः

रसालङ्कारात्मकं वाक्यं काव्यम्। -केशवमिश्रः

रसादिमत् काव्यम्। -शोद्धोदनिः

वाक्यं रसात्मकं काव्यम्।[19]

ध्वनिः काव्यस्य जीवितम् काव्यम्।[20]

शब्दार्थयोर्यथावत् सहभावेन विश्रा साहित्यविद्या।[21]

गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ।

काव्यं काव्यविदो विदुः।[22]

कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यम्।[23]

रमणीयार्थप्रतिपादकः शब्दः काव्यम्।[24]

आस्वादुजीवातुः पदसम्बन्धः काव्यम्।[25]

तत्र निर्दोषशब्दार्थगुणवत्त्वे सति स्फुटम्।

गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम्।। -अच्युतरायः।

सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितो।। -धर्मसूरिः।

---

17 जयदेवः, चन्द्रालोकः १.७

18 हेमचन्द्रः, काव्यानुशासनम् पृ. १६

19 विश्वनाथः, साहित्यदर्पणः पृ. २१

20 अभिनवगुप्तः, लोचनम्

21 राजशेखरः, काव्यमीमांसा अ.२ पृ.५

22 विद्यानाथः, प्रतापरुद्रयशोभूषणम् पृ.४२

23 महीमभट्टः, व्यक्तिविवेकः पृ.१०१

24 जगन्नाथः, रसगङ्गाधरः १.१

25 चण्डीदासः, दीपिका (काव्यप्रकाश-प्र.उ.१.४)।

गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावगौ।

नित्यं दोषविनिर्मुक्तौ काव्यमित्यभिधीयते॥ - न्यायवागीशः।

उपर्युक्तकाव्यलक्षणपर्यालोचनेन स्पष्टतया प्रतिभाति यत् आलङ्कारिकाचार्येषु पक्षत्रयं वर्तते।

१. शब्दार्थोभयं काव्यम् इति प्रथमः। २. शब्दप्रधानं काव्यमिति द्वितीयः। ३. रसान्वितं काव्यमिति तृतीयपक्षः। अत्र शब्दः, अर्थः, शब्दार्थौ वा कव्यस्य आत्मा न भवितुं शक्नोति। आत्मनः व्यापकत्वेन निराकारत्वेन च भाव्यम्। शब्दः, अर्थः, शब्दार्थौ वा न तथा। अतः सर्वेषां लक्षणानां विवेचनं विहाय कतिपयानामेव प्रधानाचार्यकृतानां लक्षणानां विवेचनं विधीयते।

अत्र शब्दार्थोभयं काव्यमिति प्रतिपादयितृषु भामहाचार्यःचिरन्तनोऽस्ति। तस्य मतं यत् "शब्दार्थौ सहितौ काव्यम्।" अत्र सहितपदस्य सहभावापन्नोऽर्थः। यत्र शब्दः अर्थश्च तुल्यकोटिकी भवतः तत्काव्यमिति। इदमेव तत्त्वं काव्यमितिहासादितः पृथक् करोति। इतिहासादार्थप्रतीतये शब्दः प्रयुज्यते। तत्रार्थस्यैव प्रधान्यं भवति शब्दस्तु गौण एव। काव्ये तु शब्दार्थयोरुभयोरपि समानं महत्त्वं विद्यते। यतश्चोभावापि तुल्यरूपेण गुणदोषालङ्काराणामाधायकौ स्तः। अत एवानयोः न मुख्यगौणभाव; अपि तु सदा सहभाव एव चान्यशास्त्रेभ्यः काव्यं भिन्नं भवति। अत एव च रूद्रटेन-"ननु शब्दार्थौ काव्यम्।" इति प्रतिपाद्य स्वकीयाभिप्रायं प्रकाशयति यत् "उभयपदार्थप्रधानो द्वन्द्वः" इति लक्षणेन "शब्दश्चार्थश्चेति" विग्रहेण चोभयपदार्थस्य प्राधान्ये लब्धे तद्बोधकद्विवचनमात्रेण च परेषामपि बोधे सम्पन्ने तदर्थं 'सहितौ' इति। विशेषणमपि नावश्यम्। वेदादिशास्त्रेषु शब्दस्य इतिहासादावर्थस्य च यथाप्राधान्यं तथा काव्ये नास्ति। काव्ये उभयोः प्राधान्यमभीष्टम्। अत एव रूद्रटेन स्वकीयकाव्यलक्षणे 'ननु' शब्दं प्रयुज्य भामहकृत् काव्यलक्षणे सहितौ इति पदप्रयोगं प्रति अरूचिः प्रदर्शिता, यतश्च लक्षणवाक्यं सूत्रवद् भवति। तत्रानावश्यकशब्दप्रयोगो नोचितः। आनन्दवर्धनाचार्येणापि स्वकीयध्वनिकाव्यलक्षणे प्रतिपादितं यत् यत्र शब्दः स्वकीयार्थम् अर्थो वा आत्मानं गौणं विधाय तथा भूतस्यार्थस्याभिव्यक्ति कुर्यात् यः वाच्यार्थापेक्षयाऽधिक चमत्कारपूर्णो भवेत्।[26] अनेन काव्य व्यजकशब्दार्थयोः प्राधान्यं प्रतिपादितम्। वक्रोक्तिजीविताकारेण कुन्तकेनापि भामहस्य शरणिमवलम्ब्य प्रतिपादितम् यत् सहभावापन्नः शब्दार्थयुगल एव यदा कवेः वक्रोक्तिमयव्यापारयुक्तबन्धने व्यवस्थितो भवति तदा काव्यं कथ्यते। एवञ्च तत् ज्ञातृणां कृते आह्नादकारकं भवित।[27]

साहित्यविद्यानाम् शब्दार्थयोः यथावत् सहभावेन सम्पन्ना विद्येति काव्यमीमांसायां राजशेखरः प्रतिपादितवान्।[28] सगुणः दोषरहितः यथासम्भवालङ्कारयुक्तः शब्दार्थयुगलः काव्यमिति अलङ्कारशास्त्रस्य

---

26 यत्रार्थः शब्दो वा तमर्थ ......सूरिभिः कथितः। ध्वन्यालोकः१/१।

27 शब्दार्थौ सहितौ वक्रकविव्यापार.......कारिणि । वक्रोक्तिजीवितम् पृ०२१७

28 शब्दार्थयोर्यथावत्..... विद्या।" काव्यमीमांसा अ० २ पृ०-५।

मूर्धन्यः आचार्यमम्मटः प्रतिपादितवान्।29अत्रालङ्कारस्य वैकल्पिकतां प्रदर्श्य तस्मिन् गौणता प्रतिपादितः। जैनाचार्यहेमचन्द्रेणापि मम्मटशरणिमवलम्ब्येव स्वकीयकाव्यलक्षणे दोषरहितौ गुणालङ्कारयुक्तौ शब्दार्थो काव्यमिति प्रतिपादितम्।30 अवमेव वाग्भट्टः, विद्यानाथादयः तत्परवर्तिनः आचार्या शब्दार्थयुगलं काव्यमिति स्वीकुर्वन्ति। राजानक रुय्यक कृतालङ्कार सर्वस्वस्य कश्चित् टीकाकारः समुद्रबन्धः विशिष्टाब्दार्थौ काव्यमिति कथितवान्।31शब्दार्थयोः विशिष्टायाः आधायकः धर्मः व्यापारः एवं व्यङ्ग्यः भवति। तत्र धर्मपक्षे विशिष्टतायाः आधानं गुणैः अलङ्कारैश्च भवति। व्यापारपक्षे भणितिवैचित्र्येण भोगव्यापारेण च विशेषणां नामाधानं भवति। व्यङ्गयपक्षे विशिष्टताधायकः व्यङ्गजन्यचमत्कार एवास्ति। अथ वा व्यञ्जनावृत्तिः। अत्राचार्यवामनः गुणात्मकधर्मविशिष्टशब्दर्थौ काव्यमिति भामहदण्डिउद्भट्टादय आलङ्कारिकाचार्याः अलङ्कारादिधर्मविशिष्टशब्दार्थौ काव्यमिति च कथयन्ति। भणितिवैचित्र्यव्यापारस्य विशेषतां कुन्तकः स्वीकरोति। भोग भोजकत्व व्यापारस्य विशेषतया रस एव काव्यस्य सर्वस्वमिति भट्टनायकः प्रतिपादयति। व्यङ्गयस्य विशेषतायाः प्रतिपादकाः आनन्दवर्धनाद्योऽभूवन् इत्थं शब्दार्थयुगलस्य विशेषतामवलम्ब्यालङ्कारशास्त्रे पञ्चपक्षाः प्रतिपादिताः। ते एवालङ्कारशास्त्रस्य पञ्च मुख्यसम्प्रदायाः सन्ति।

काव्यलक्षणे शब्दप्रधानमूलककाव्यलक्षणमिति। द्वितीयः प्रकारोऽपि उपलभ्यते। तत्र अग्निपुराणे यथा दोषरहितालङ्कारसहितकविविवक्षिताभिप्राययुक्तापदावली काव्यमिति। दण्डिनः कायलक्षणे अग्निपुराणीयलक्षणतः साम्यं कामयते। तथा हि विवक्षितार्थपदावली काव्यमिति। चन्द्रालोककारो जयदेवः- "निर्दोषा लक्षणवती सरीतिर्गुणभूषणा। सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्।।32" इति कथितवान्। शब्द एव काव्यस्य प्रवृत्तिनिमित्तमिति प्रतिपादयन् पण्डितराजजगन्नाथोऽपि रमणीयार्थप्रतिपादकशब्दस्यैव काव्यतां स्वीचकार। 33 शाब्दार्थयुगलस्य काव्यत्वस्वीकर्तृणां खण्डनमपि विहितवान्। 34 काव्यलक्षणे शब्दस्यैव प्राधान्यमिति स्वीकर्तृषु पण्डितराजजगन्नाथोऽन्तिमः आचार्यऽस्ति।

एतद्भिन्नाः कतिपयाचार्या अभूवन् ये शब्दर्थापेक्षया रसमेव काव्यस्य परमाधायकतत्वमिति स्वीचक्रुः। अत एव काव्यलक्षणे तेषामपि उल्लेखः आवश्यकः।

काव्यस्य रसात्मकलक्षणप्रतिपादकेषु महिमभट्टभोजशौद्धोदनिचण्डीदासविश्वनाथादयः मुख्याः आचार्या अभूवन्।

---

29 "तददोषौ शब्दाथौ सगुणावनलङ्कृती पुनः क्वापि।" काव्यप्रकाशः प्र०उ० १/४।

30 "अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम् ।" काव्यानुशासनम् पृ० १६।

31 "इह विशिष्टौ शब्दार्थौ काव्यम् । तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापार........... पञ्चमआनन्दवर्धनेन-अलङ्कारसर्वस्वटीका।

32 चन्द्रालोकः १.७।

33 रमणीयार्थप्रतिपादकः शब्दः काव्यम्।' रसगङ्गाधरः १.१।

34 यत्तु प्राञ्च-"अदोषौ सगुणौ सालङ्कारौ शब्दाथौ काव्यम् " इत्याहुः तत्र विचार्यते शब्दार्थयुगलं..... पदार्थत्त्वप्रतिपत्तेश्च। रसगङ्गाधरः पृ०-१५।

तत्र महिमभट्टस्य कथनं यत् कवेः विभावादिसंयोजनात्मकः सव्यापार एव काव्यम् यत्र रसाभिव्यक्तिरनिवार्यरूपेण भवेत्। तथा च तल्लक्षणं व्यक्तिविवेके-" कविव्यापारो हि विभावादि-संयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यम्।" 35 यद्यपि लक्षणस्यास्य विशदा व्याख्यापेक्षितास्ति, तथापि संक्षेपेण कविव्यापार एव काव्यमिति। अत्र कविपदसान्निध्यात् व्यापारशब्दः काव्यात्मकव्यपारविशेषस्यैव बोधकः न विहरणादिव्यापारसामान्यस्य।

काव्यात्मकव्यापारश्च शब्दार्थमादायैव सम्भवति। अतः कविव्यापारपदेन काव्ये शब्दार्थसत्ता स्वतः सिद्धा भवति। इत्थं कवेः शब्दार्थविषयकव्यापार एव काव्यमिति फलितम्। कविव्यापारकथनेन धर्म-दर्शन-पुराणेतिहासादिगत शब्दार्थविषयकव्यापारेण कविव्यपारः सर्वथाभिन्नो भवति। यतः धर्मशास्त्रादौ अर्थमात्रस्य प्राधान्यमत्र पुनः शब्दार्थयोः साम्यमेवेति। अतः शब्दार्थौ काव्यमिति प्रतिपादनापेक्षया कविकर्म कविव्यापारो वा काव्यमिति प्रतिपादनम् काव्यलक्षणदृष्ट्योपयुक्ततरमवगम्यते। अत एव काव्यप्रकाशस्य प्रसिद्धटीकाकारः झलकीकरवामनः महिमभट्टस्य सरणिमवलम्व्य कविकर्म काव्यमिति प्रतिपादितवान्। लोकोत्तरवर्णनानिपुणः कविः इति कवेः परिभाषां विहितवान्। शब्दार्थविषयकाः न कवेः सर्वे व्यापाराभिप्रेताः अपि तु स एव व्यापारोऽभिप्रेतः यस्मिन् रसाभिव्यक्तौ व्यभिचारो न भवेदिति अत एव 'रसाभिव्यक्ताव्यभिचारी' इति विशेषणं विहितवान्।

व्यभिचारिपदस्य 'क्वचित् प्रवृतिः क्वचिदप्रवृत्तिरित्यर्थकत्वेन कुत्रचित् रसोपेता रचना स्यात् कुत्रचिच्चरसापेताऽपि रचना सम्भवति। यतश्च रसः विभावादिजीविताविधिर्भवति। एवञ्च यावत् विभावादिः तिष्ठति तावत् रसोऽपि तिष्ठति। अपगते विभावादौ रसोऽपि अपगतो भवति। अतः विभावादीनामुचितरूपेण संयोजनमावश्यकम्। इत्थञ्च विभावादीनां तथा संयोजनमावश्यकं येन रसनिष्पत्ति भवेदेवेति कविव्यापारोऽभीष्टोऽस्ति। अत एव 'विभावादि संयोजनात्मा' 'रसाभिव्यक्ताव्यभिचारी' इति पद द्वयं कवि व्यापारे विशेषणम्।

अनौचित्यातिरिक्तं न किमपि रसभङ्गे अन्यत् कारणम्। 36 अनौचित्यञ्च दोषाऽपरपर्यायास्ति। महिमभट्टस्यापि इदमेवाभिमतं यत् काव्यास्यात्मा रस एवास्ति। 37 रसस्य अनिवार्यसत्ताया काव्ये गुणानां विद्यमानत्वं सुतरां सिद्धयति। एवञ्च गुणस्य विशेषणत्वेनोपादानात् गौरवमपि लक्षणे नायाति। अतः कवि व्यापारोहि विभावादि संयोजनात्मा, रसाभिव्यक्ताव्यभिचारी काव्यम्38 इति लक्षणं प्रतिपादितवान्।

न च यत्रापि रसाभिव्यक्तिस्तत्र विभावादिः स्थास्यत्येव यतः विभावादिं विना रसाभिव्यक्तेरसम्भवात्। एवञ्च काव्यलक्षणे विभावादिविशेषणं व्यर्थम् इति वाच्यम्। विभावादि विशेषणं विना

---

[35] व्यक्तिविवेकः पृ० १०१।

[36]"अनौचित्यादृतेनान्यद्रसभङ्गस्यकारणम् ।।" ध्वन्यालोक पृ० - १५९

[37]"काव्यस्यात्मनि संज्ञिनि रसादिरूपेण कस्यचिद्विमति ।" व्य०का० १.२६

[38] व्यक्तिविवेकः पृ० १०१।

रसाभिव्यक्तिरेवाऽसम्भवात् तथा हि-कवेः व्यापारास्य साक्षात् सम्बन्धः न रसेन अपि तु विभावादि वर्णनमात्रेण भवति। कविः केवलं विभावादि संयोजनं तद् वर्णनं वा कर्तुं शक्नोति। रसाभिव्यक्तिस्तु तस्मिन्नन्तर्निहितं तिष्ठति। कविना रसो न क्रियते स स्वयमभिव्यक्तो भवति। रसो न काव्यमिति प्रायः सर्वैराचार्यैः स्वीक्रियत एव। महिमभट्टस्तु रसाभिव्यक्तिप्रक्रियायां विषये श्रीशङ्कुकस्यानुयायी अस्ति। यः रसमनुमेयं प्रतिपादितवान्। रसानुभूतेः प्रयोजकाः नटप्रकाशिताः कविवर्णितनायकनायिकागतविभावादय एव भवन्ति। अतः न कवेः व्यपारः रसाभिव्याक्तिपरकः सम्भवति अपि तु विभावादि सर्जन परक एव।

किञ्च विभावादि संयोजनाभावे रसाभिव्यक्त्यव्यभिचारिपदस्य कविव्यापारशब्देनाऽन्वयोऽपि न सम्भवति। यतश्च कविव्यपारः विभावादि संयोजनात्मक एव सम्भवति। रसानुभूतिस्तु तस्य परिणाममात्रमस्ति यः सहृदयैः विभावादि परामर्शेन स्वतः अनुभूयते। अतः कविव्यापारपदस्य रसाभिव्यक्त्य व्यभिचारिपदेन विशेष्य विशेषणभावेनाऽन्वयार्थं 'विभावादि संयोजनात्मा' इति विशेषणन्नितान्तमपेक्षितं सर्वथा सार्थकञ्चास्ति।अपि च शब्दार्थ संयोजनात्मापदापेक्षया विभावादि-संयोजनात्मापदस्य सन्निवेशेऽपि कश्चिदभिप्रायविशेषोऽस्ति। एकस्तु अयमेव यत् तत्पदमपेक्षाकृतामधिकमहत्वपूर्णमस्ति। विभावादि संज्ञातः कारणादेः अलौकिकता एव एकमात्र काव्यानुगुणतायाः स्वतः ग्रहणं भवति। द्वितीयस्तु संयोजनात्मकपदे सम् पूर्वक युज् धातोः ल्युटि संयोजनेति सम्पद्यते। तस्यार्थस्तु औचित्यात्मक योजनेति। स चार्थः विभावादेव सम्भवति नान्यत्र। इत्थं काव्यलक्षणे विभावादि-संयोजनात्मेति पदं सर्वथायुक्ति-युक्तं साभिप्रायञ्च प्रयुक्तमस्ति। अत एव एकस्मिमन् स्थले कस्यापि काव्यलक्षणं प्रसङ्गवशादुद्धृत्य। तस्मिन् विभावादि वर्णनमेव काव्यमिति प्रतिपादितवान्।[39]महिमभट्टः तेन तत्र स्पष्टमेवोक्तं यत् गुणालङ्कार-संस्कृतशब्दमात्रमेव न काव्यमस्ति। यतःरसात्मकताया अभावे मुख्यवृत्या तत्काव्यमेव न स्यात्। रसात्मनि काव्ये वस्तुमात्रेण विशेषताया आधानं कथमपि नसम्भवति।यतः विभावादिसंग्रन्थनरूपेणैव रसाभिव्यक्तेः प्रयोजको भवति।[40]

इत्थञ्च काव्ये रसस्याव्यभिचरितोपस्थितिस्तु "विभावादिसंयोजनात्मेति विशेषणे नैव सम्भवेन" पुनः रसाभिव्यक्त्यव्यभिचारीति विशेषणं व्यर्थमिति। यतश्च सर्वेरसवादिनः आचार्याः विभावादिसंयोगेनैव रसनिष्पत्तिरिति स्वीकुर्वन्ति। रसश्च विभावादि जीवितावधिरिति च। एवञ्च यावत् विभावादेः स्थितिः तावत् रसनिष्पत्तिः विभावादेः स्थित्यभावे रसनिष्पत्यभाव इत्यन्वय व्यतिरेकेण विभावादिरेव रसनिष्पत्तेः साधकः। तथा च विभावादि संयोजनात्मेति विशेषणेनैव निर्वाहे पुनः रसाभिव्यक्त्यव्यभिचारीति द्वितीयविशेषणं व्यर्थमिति।

इदमत्रावधेयं यत् विभावादिसत्तायां रसनिष्पति; तदभावे तदभावः इत्यन्वयव्यतिरेके सत्यपि स्वायिभावादि विद्यमानतायामपि दोषविशेषसत्वे वा रसनिष्पत्तिर्न भवति। तथा हि---रसदोषप्रसङ्गे अवस्था विशेषे

---

39 "अनुभावविभावानां वर्णना काव्यमुच्यते ।" व्यक्तिविवेकः पृ० १०२

40 अत एव च गुणालङ्कारसंस्कृतमात्र.........हेतुत्वोपगमात् । व्यक्तिविवेकः पृ० १०३

विभावादौ सत्यपि रसनिष्पत्तिर्न भवति।[41] आनन्दवर्धनेन स्पष्टतया प्रतिपादितम् यत् सत्यपि सामग्रीसमुदाये औचित्याभावे रसपरिपाको न भवति।[42] र्सरहितरचना न काव्यमिति अपि तु रसोपेतरचनैव काव्यमिति आचार्यस्याभिप्रायः। अतः 'विभावादि संयोजनात्मा' इति विशेषणसत्वेऽपि रसाभिव्यक्त्यव्यभिचारी' इति द्वितीय विशेषणं विहितमाचार्येण। अत एव आचार्य रूय्यकेन व्यक्तिविवेकव्याख्याने काव्यरक्षणप्रसङ्गे प्रतिपादितं यदत्र कविव्यापारः न सामान्यरूपेणाभीष्टः। अपितु विभावादि घटनानुरूपः अत एव नियमेन रसापेक्ष्यापि।[43]

अत एव आचार्यमहिमभट्टेन स्पष्टतयोद्घोषितं यत् रसविरहितं ध्वनिपदेनाऽप्यभिहितं काव्यं न काव्यमिति। उद्धृता च ध्वन्यालोकस्य पङ्क्तिः यत्र काव्यात्मकत्वेन रसो गृहीतोऽहित।[44] रसाभावे काव्यस्यैवाभावेन ततः कृत्याकृत्यव्युत्पत्तिरूपफलकामनापेक्षया तदनारभ्य एव श्रेयस्कर इति।[45]

यत्तु रसपरककाव्यलक्षणं सामान्यं तत्राव्याप्तिदोषग्रस्तमिति। तथा हि कावये रसस्याऽव्यभिचारितो-पस्थितिस्वीकारे वाल्मीकिव्यासाद्युत्कृष्टकविकृतोत्कृष्टकृतिषु यो भागः निःसंदिग्धतया न रसोद्बोधकः, एवञ्च वस्त्वलङ्कारादिभिश्चमत्काराधायकोऽस्ति स काव्यकोटौ नागच्छेत्। तथा च काव्यविषयः स्वल्पतमो भवेत्। यदि च तासु रचनास्वपि यथाकथञ्चित् रसस्य लेशमात्रं स्वीकृत्य काव्यता स्वीक्रियते तदा "अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्राद्यन्नुल्लसन्येषु धूमः' इत्यादिस्थलेऽतिव्याप्तिः दुर्वारा स्यात्। इत्यथञ्च कूपपतनं विहाय द्योरतमगर्ते पतनमिव स्यात्।

पण्डितराजजगन्नाथः 'रसगङ्गाधरे' साहित्यदर्पणकारस्य कविराजविश्वनाथस्य रसपरककाव्यलक्षणस्य "वाक्यं रसात्मकं काव्यम् " इत्यस्याऽनिर्णीतमिति प्रतिपाद्य तत्खण्डनं विहितवान्। यतः रसवद्वाक्यस्यैव काव्यत्वस्वीकारे वस्त्वलङ्कारप्रधानकाव्ये रसविरहात्काव्यत्वं न स्यादिति। एवञ्च महाकविसम्प्रदायस्यैवोच्छेदः स्यात्। यथा वाल्मीकिव्यासकालिदासादयो महाकवयः स्वरचनासु स्थाने-स्थाने प्रसङ्गात् जलप्रवाहनिपतनोत्पतन-भ्रमण-कपिबालादीनां चरितवर्णनं कृतवन्तः सन्ति। तत्सर्वमकाव्यं स्यात्। यदि च यथा

[41] "रसस्योक्तिः स्वशब्देन स्थायिसंचारिणोरपि।" सा०द०पृ० १/१२-१५

[42] "औचित्योपनिबन्धस्तु रसस्योपनिषत्परा।" ध्वन्यालोक तृतीय उ०पृ० २५९।

[43] "कविव्यापारभावः न सामान्येन किन्तु विभावादि घटनास्वभावः अत एव नियमेन रसापेक्षि।"व्यक्तिविवेकःव्याख्यान।

[44] "काव्यमात्रस्य ध्वनिव्यपदेशविषयत्वे ............यत् स एवाह---काव्यस्यात्मा स एवार्थः श्लोकत्वगमाद्।" व्यक्तिविवेकः।

[45] "तदभावे (रसाभावे) चास्य............प्रेक्षावता स्यात् वैफल्यात् ।" व्यक्तिविवेकः पृ० १०१।

कथञ्चित् परम्परया तत्रापि रसस्पर्शं स्वीकृत्य काव्यत्वं स्वीक्रियते तदा "गौश्चलति" मृगो धावति इत्यादावपि अतिप्रसक्तिः स्यादेवेति। रसान्वितं काव्यलक्षणं न कथमपि सम्भवतीति।46

तन्नयुक्तिसहम् –तथाहि -साहित्यदर्पणकारस्य रसान्वितकाव्यलक्षणे एवाव्याप्त्यतिव्याप्तिदोषौ स्तः नान्यत्रेति इति न अपि तु मम्मटस्य पाण्डितराजजगन्नाथस्यापि काव्यलक्षणे स दोषः तदवस्थ एव। यथा मम्मटस्य काव्यलक्षणे शबदार्थौ इत्यस्य विशेषणत्वेन सगुणौ इति पदमस्ति। गुणश्च काव्यात्मरसस्य धर्मोऽस्ति। तस्य परम्परया शबदार्थयोः विद्यमानतापि सम्भवति। परन्तु गुणस्तु तत्रैव तिष्ठेत् यत्र रसो भवेत्। अतः परोक्षरूपेण मम्मटोऽपि स्वीक्रियत एव यत् रसः तत्तत्वं यत् काव्ये सर्वत्र व्याप्तमस्ति।

पण्डितराजजगन्नाथस्य "रमणीयार्थप्रतिपादकः शब्दः काव्यम्"47 इति लक्षणमपि रसपरकमेवेति। तेन बहुविचारपूर्वकमेव लक्षणमिदं विहितम्। का रमणीयता इति विचारे यदि अर्थ सौष्ठवं स्वीक्रियते तदा रमणीयता अव्यवस्थिता स्यात् यतो हि भिन्नरूचिर्हि लोको भवन्ति। रूचिमेदेत सौष्ठवं भिन्नं स्यात्। योऽर्थः कस्यापि मते सुष्ठु विद्यते स एव अन्यमते असुष्ठु भवति। अतः पण्डितराजेन स्वयमेव निर्वचनं विहितम्। तथा च लोकोत्तरानन्दानुभूतिः यतो भवेत् स रमणीयः।48 लोकोत्तरत्वं यदि सातिशयत्त्वं स्यात्तर्हि रूचिभेदेन व्यक्तिभेदेन च आनन्दमात्रं लोकोत्तरं स्यात्। एवञ्च न कश्चिल्लाभः अपि तु अव्यवस्था तद्वस्था एव। यदि चानन्दगत-लोकोत्तरत्वं निरतिशयत्त्वं अर्थात् यतोऽधिको द्वितीयो नास्ति तदा ब्रह्मानन्दातिरिक्तः आनन्दः न स्यात्। अतः लोकोत्तरत्त्वमानन्दगतजाति विशेषोऽस्ति। यस्य चमत्कारत्वमिति नामान्तरमस्ति। 49 तत्सत्तयां सहृदयानमनुभव एव प्रमाणमस्ति। तथा च यस्मिन् आनन्दे लोकोत्तरोऽयमिति अनुभवो भवेत् स एव लोकोत्तरोह्लादोऽस्ति। लोकोत्तरानन्दे धारावाहिकभावनाविशेषः शब्दबोधात्मकानुभव एव कारणमिति निर्देशो विहितः। आनन्दोऽयम् अत एव लोकोत्तरः यतः 'तव गृहे पुत्रो जातः' 'तुभ्यमहं धनं दास्यामि' इत्यादि वाक्यैः उत्पद्यमानभावनातः सर्वथा भिन्नोऽस्ति।50 अयं लोकोत्तराह्लादः न रसानुभूतेर्भिन्नः अपि तु रसानुभूतिरेवास्ति। कविराजविश्वनाथादयः सर्वे आचार्याः रसानुभूतेः स्वरूपमेव कथितवन्तः रसानुभूतावपि सहृदयानुभव एव प्रमाणमस्ति।51 इत्थं पण्डितराजजगन्नाथस्य काव्यल्लक्षणस्य तद्गतपदव्याख्यानुसारेण रमणीयार्थप्रतिपादकः

---

46 "यत्तु रसवदेव काव्यम्' इति साहित्यदर्पणे निर्णीतम् तन्न। वस्त्वलङ्कारप्रधानानां काव्यायानां काव्यत्वानापत्तेः। न चेष्टापत्तिः। महाकविसम्प्रदायस्य.............गौश्चलति मृगो धावति। इत्यादावतिप्रसङ्गत्त्वेनाप्रयोजकत्वात् । रसगङ्गाधरः।

47 रसगङ्गाधरः १.१।

48 "रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता।" रसगङ्गाधरः १.१।

49 "लोकोत्तरत्त्वं चाह्लादगतश्चमत्कारत्वापरपर्य्यायो अनुभवसाक्षिको जातिविशेषः।" रसगङ्गाधरः १.१।

50 "कारणञ्चात्र तदतावच्छिन्ने भावनाविशेषः पुनःपुनरनुसन्धानात्मा।'पुत्रस्तेजातः' 'धनं ते दास्यामि' इतिवाक्यार्थ........ काव्यत्वप्रसक्तिः। रसगङ्गाधरःपृ०१२।

51" सचेतसामनुभवः प्रमाणस्तत्र केवलम् ।" साहित्यदर्पणम् प्र०प० ३/३।

(रसोद्बोधे समर्थः) शब्द एव काव्यम् इति आगच्छति। पुनः अस्य मतेऽपि महाकवि प्रणीत कपिबालचरितादौ लोकोत्तराह्लादरूप रसोद्बोधक्षमता कथमभूदिति।

## सन्दर्भग्रन्थसूची


1. सिंह, नागशरण (सं.) १९८५.- अग्निपुराणम् नागपब्लिशर्स,दिल्ली-७.
2. दुर्गाप्रसाद एवं काशीनाथ, (सं.) १९८२. ***अलंकारसर्वस्वम्- राजानकरुय्यकः,***भारतीय विद्याप्रकाशन वाराणसी.
3. ***ईशादि नौ उपनिषद्*** - शाङ्करभाष्य, सं.२०६३. गीताप्रेस, गोरखपुर.
4. झा, श्री व्रजमोहन, सं. १९८२. ***औचित्यविचारचर्चा- क्षेमेन्द्रः***, चौखम्बा विद्याभवन वाराणसी०१
5. पराशरः, योगेश्वरदत्तशर्मा (सं.) १९९९. काव्यादर्शः, नागपब्लिशर्स,दिल्ली.
6. नगेन्द्र (सम्पा.) १९९८. ***काव्यप्रकाशः ,*** ज्ञानमण्डललिमिटेड, वाराणसी.
7. ज्योत्स्नामोहन (सम्पा.)१९९५. ***काव्यप्रकाशः*** नागपब्लिशर्स,दिल्ली.
8. भट्टाचार्यः, शिवप्रसाद (सम्पा.) १९६५. ***काव्यप्रकाशदीपिका- चण्डीदासः,*** वाराणसेय संस्कृतविश्वविद्यालयः वाराणसी.
9. शर्मा, देवेन्द्रनाथ (सम्पा.) १९६२. ***काव्यालङ्कारः- भामहः,*** बिहार राष्ट्रभाषा परिषद् पटना.
10. शुक्ल, रामदेव, १९८९. ***काव्यालङ्कारः- रुद्रटः,*** चौखम्बा विद्याभवन वाराणसी.
11. काव्यानुशासनम्- वाग्भट्ट(द्वितीय), निर्णयसागर प्रेस, बम्बई १९१५.
12. नगेन्द्र, (सम्पा.) १९९४. ***काव्यालंकारसूत्रवृत्तिः,*** हिन्दी माध्यम कार्यान्वय निदेशालय, दिल्ली विश्वविद्यालय. दिल्ली.
13. शुक्ल, बदरीनाथ (सम्पा.) १९७१. ***चन्द्रालोकः,*** मोतीलाल बनारसीदास, वाराणसी.
14. पाठक, जगन्नाथ (सम्पा.) २०००. ***ध्वन्यालोकः(लोचनसहितः),*** चौखम्बा विद्याभवन वाराणसी.
15. झा, मदनमोहन (सम्पा.) २००८. ***रसगङ्गाधरः***, चौखम्बा विद्याभवन, वाराणसी.
16. नगेन्द्र (सम्पा.) १९९५. ***वक्रोक्तिजीवितम्***, हिन्दी माध्यम कार्यान्वय निदेशालय, दिल्ली विश्वविद्यालय.
17. द्विवेदी, रेवाप्रसाद (सम्पा.) सं.२०५५ विक्रमी. ***व्यक्तिविवेकः***, चौखम्बा संस्कृत संस्थान वाराणसी.
18. शास्त्री, जगदीशलाल (सम्पा.) १९८७. ***शुक्लयजुर्वेदसंहिता***, मोतीलाल बनारसीदास, वाराणसी.
19. मिश्र, कामेश्वरनाथ (सम्पा.) २०००. ***सरस्वतीकण्ठाभरणम्,*** चौखम्बा ओरियन्टालिया, दिल्ली.
20. ऋषि, उमाशंकरशर्मा (सम्पा.) २००१. ***सर्वदर्शनसंग्रहः ,*** चौखम्बा विद्याभवन वाराणसी.
21. पराशरः, योगेश्वरदत्तशर्मा (सम्पा.) १९९९. ***साहित्यदर्पणः***, नागपब्लिशर्स,दिल्ली.